# Vetalabhairavabhyam Kritam Shiva Stotram

# वेतालभैरवाभ्यां कृतं शिवस्तोत्रम्

## Document Information

Text title : Vetalabhairavabhyam Kritam Shiva Stotram

File name : shivastotramvetAlabhairavAbhyAMkRRitaM.itx

Category : shiva, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : Kalikapurana Adhyaya 51 shloka 179-198

Latest update : January 15, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 15, 2022

*sanskritdocuments.org*

# वेतालभैरवाभ्यां कृतं शिवस्तोत्रम्

वेतालभैरवावूचतुः
पञ्चवक्त्रं महाकाव्यं सर्वज्ञानमयं परम् ।
संसारसागरत्राणं प्रणमावो वृषध्वजम् ॥ १७९॥

त्वं परः परमात्मा च परेशः पुरुषोत्तमः ।
त्वं कूटस्थो जगद्व्यापी प्रधानः परमेश्वरः ॥ १८०॥

रूपात्मा त्वं महातत्त्वं तत्त्वज्ञानालयः प्रभुः ।
साङ्ख्ययोगालयः शुद्धो गुणत्रयविभागवित् ॥ १८१॥

त्वं नित्यस्त्वमनित्यश्च जगत्कर्ता लयः स्मृतः ।
एकोऽनेकस्वरूपश्च शान्तचेष्टो जगन्मयः ॥ १८२॥

निर्विकारो निराधारो नित्यानन्दः सनातनः ।
त्वं विष्णुस्त्वं महेन्द्रस्त्वं ब्रह्मा त्वं जगतां पतिः ॥ १८३॥

यो रूपरूपेश्वररत्नमालः सम्भूतिभूतो निरवग्रहश्च ।
काक्ष्यावतीर्णावगतप्रमाथी योगेश्वरो ज्ञानगतिस्त्वगम्यः ॥ १८४॥

प्रमेयरूपात्मधराधराभो भोगीन्द्रबद्धामृतभोगतन्त्रः ।
सूक्ष्माक्षरस्तत्त्वविदप्रमाथी त्वं देवदेवः शरणं सुराणाम् ॥ १८५॥

विकल्पमानापरिहीनदेहः शुद्धान्तधामानुगतैकविद्यः ।
वर्धिष्णुरुग्रः पुरुषः परात्मा त्वमिन्द्रियौघस्य विचारबुद्धिः ॥ १८६॥

त्वं नाथनाथ प्रभवः परेषां गतिर्मुनीनां परयोगिगम्यः ।
त्वं भूधरो भागधरो ह्यनन्तो विश्वात्मनस्ते बहवः प्रपञ्चाः ॥ १८७॥

ज्ञानामृतस्यन्दकपूर्णचन्द्रो मोहान्धकारस्य परः प्रदीपः ।
भक्तात्मजानां परमः पिता त्वं कामे च पञ्चाननरूपधारी ॥ १८८॥

शास्त्राखिलानां प्रथमो विवस्वांस्तनूनपात् त्वं तनुषे गुणौघान् ।

त्वं ब्रह्मरूपेण करोषि सृष्टिं विष्णुस्वरूपैः सततं स्थितिं च ॥ १८९॥

त्वं रुद्ररूपी कुरुषे तथान्तं त्वत्तो न चान्यज्जगतीह वस्तु ।
त्वं रात्रिनाथो दिवसेश्वरश्च त्वमग्निरापः पवनो धरित्री ॥ १९०॥

नभस्तथा त्वं क्रतुतन्त्रहोता त्वमष्टमूर्तिर्भवतो न चान्यत् ।
अनन्तमूर्तिस्त्विह मुख्यभावान्निगद्यते चाष्टमयी त्रिमूर्तिः ॥ १९१॥

अनन्तमूर्ते कथमन्यथा ते सङ्ख्यास्ति रूपस्य यदष्टमूर्तिः ।
त्वं त्र्यम्बकस्त्वं त्रिपुरान्तकश्च त्वंशम्भुरीशः शमनो विधाता ॥ १९२॥

सहस्रबाहुश्च हिरण्यबाहुः सहस्रमूर्तिस्त्विह पञ्चवक्त्रः ।
प्रभूतनेत्रस्तु षडर्द्धनेत्रः प्रभूतबाहुर्दशबाहुरीशः ॥ १९३॥

प्रभूतभोगी मितभोगयुक्तो भोग्यानुसारो निरवग्रहश्च ॥ १९४॥

नित्यानित्यस्वरूपाय नित्यधामस्वरूपिणे ।
परतत्त्वस्वरूपाय नमस्तुभ्यं शिवात्मने ॥ १९५॥

नान्तं लिङ्गस्य यस्याप्तं विष्णुना ब्रह्मणा तव ।
तस्यावां किं विधास्यावः स्तुतिवाक्यं वृषध्वज ॥ १९६॥

स्वरूपं यस्य जानन्ति न देवा नापि दानवाः ।
आलावावां कथन्तु त्वां स्तोष्यावः परमेश्वरः ॥ १९७॥

भक्तिमात्रेण देवेश तवावां वृषभध्वज ।
कुर्वः प्रणामं गौरीश भूयस्तुभ्यं नमो नमः ॥ १९८॥

इति कालिकापुराणे एकपञ्चाशत्तमाध्यायान्तर्गतं वेतालभैरवाभ्यां
कृतं शिवस्तोत्रं सम्पूर्णम् ।

Proofread by PSA Easwaran

*Vetalabhairavabhyam Kritam Shiva Stotram*

pdf was typeset on January 15, 2022

Please send corrections to *sanskrit@cheerful.com*